पि मनोभवत्वात्तेनापि यत्तज्ज्ञातुं न शक्यते तत्रान्यस्य का कथा बालानां चित्तचांचल्यात्वलाभिलषनिश्चयाभावादत्र

स॰२

नै॰टी॰ २०

एवत्तातोस्मीतिभावः अतो निश्चयार्थं पुनर्वादिष्यामीत्यर्थः अथ वचोत्तानामल्पकामस्त्वाल्कामवाणस्तथा। नपीडयत्तियथात
रुणीनामिति तत्स्यच्युतसायकत्वे युक्तौ। अन्योपि धानुकश्चं वलेल स्येच्युतसायकौ भवति। भाव्यंस्मिन्नवामीति धातुसं
वंधेपत्ययः। अपिः संभावनायां॥७॥ निश्चयाभावेमाहृशेनरा जावोधयितुं शक्योनेत्याह। महीति। सनैषधेंडुः निषध
देशो इव जनानां इंदुरा ह्लादकः मह्यामहे इ इव वेलुपस्मात्। तत्तस्मान्मद्धिधेनविश्वास्यनष्टपज्ञनेनेव नीवज्जनेने
वसनलः इच्छामेववाला हृदयवंवलत्वसमर्थनप्रकारेणसनलः संशयकंप्रसंदेहवंवलेइहइनलाभिलाषलंत्तण
प्रयोजनंकार्यइस्यामेव अविचार्यैववाकपंवोधनीयः केनप्रकारेणत्तापनीयः। यथाऽविश्वासेनमद्धैर्यणभयेत्यक्रोशात्ताः
अविचार्यपत्किंविडुच्यते तथामया अनिश्चितंवत्कुंनशक्यत इत्यर्थः इस्यामेव वा नयात्वयाहंयथाहंवोधितः तथामयास
कपंवोध्यनइति वा दृष्यगत्तनः स्मजोनीवमत्वेवेत्ति विश्वः मह्यामहे इ इवसप्तमीतियोगविभागात्समासः। षष्टीसमासो
वागतिवुद्धिनिकर्मत्ववोधनीयइतिकर्मत्ति कल्पं पूर्वोक्तमेव द्रष्टमतिपितुर्योगेन। आत्तयानिज्ञेछयावाछया
वात्वंयदिअन्यंनलव्यतिरिक्तं युवानंतरुणंवृणीषेत्त हिंत्वद पंतुमंत्वयामेमीपारिणतव्येति अर्थिवस्तुतियाम्यो
कारिणीमपि निषधेश्वरस्य नलस्य कीदृक् कीदृशीप्रतीतिर्विश्वासः स्यात् प्रतारकोयमितितस्य वुद्धिः स्यात्। निश्च २०

७१

यं विनात्मस्थाये वक्तुं न पुत्रकमि त्यर्थः। य धर्मे यस्त्वे वेतिको दृग्वेतिवावशष्टो यो नतीयः। अर्थं त्वहति कृत्स्नः किं पितृकृ।
॥७२॥ संदिग्धे कार्ये त्वया पिनाहं नियोक्तव्य इत्याह। त्वयेति। ह्या या पि शंकितं वि क्रियेय संभावित वरांतरवशात्त्व त्ता एव विका
रस्मिन्नर्थविषये विवाहलक्षणे निधातुं योजयितुं किं वा किमिति अहे अपि किं त्व अधिकारी किं वे अस्मिन्नधिकारेन
योऽस्य इत्यर्थः। हे उर्वीपति पुत्रि राजपुत्रि त्वं इतो विवाहकार्यात् तृष्टे पकृ अन्यत्र पर्यत्रार्थयसे। याचसे अहं तस्म
द्वेषमपि कुर्वे साधये यं। प्रार्थयसे कुत्वे इति वर्तमान सामीप्ये लट्॥७३॥ अथ इति। धरित्री पुरुहूतपुत्री एवं वीडपु
त्री पुनरेव। किं कृत्वा अवः कर्णप्रविष्टः कर्णांतर्गताः ताः एवं वो कान्त्कृरोहं सवाण्याः वेमत्येन असंमत्या धुतेन कं
पितेन मस्तकेन विद्धूपेव निरस्येव। किं नतात् क्रियो पितृत्वंता या अपि पिश्लथीकृतः अनुबंधोऽनुसंधानं यया। अथवा प्रविण
इवेति केचित्। तदा प्रतिकूलत्वानुताइति इवेत्युक्तं। अ[illegible]पि कर्णप्रविष्टस्य कीरादे निराकरणं धे शिरश्चालनं क्रि
यते। यालज्जा सर्वथा त्यक्तुं न शक्या सापित्यक्तेति अपि शब्दार्थः। वेमत्यं दृढादिपाठात् भावे ष्यञ्। कर्मधारयाद्वास्वा
र्थे तापकात्। ब्रजो जिलाद्द्वेषस्तूः॥७४॥ दृष्ट्वेति तद्वयेन पितृकर्तृकं नलाभस्वकर्तृकं परित्यज्यं निराकरोति श्लोकद्व
येन। मम अन्यस्मिन्नत्वद्व्यतिरिक्ते यवराय पितृकर्तृकं दानं प्रतिदिश्य पितु नि[illegible]गे नेत्याहरियाकल्पनाशंका। तर्कः ए

स०२

नै०च०टी० घ्राता वत्सकल्पनात्वरीयम् । द्विवेदः वेद इ प्रमाणमस्ता इति चेन्न हि त्वं निशोपि शोत्रव पि सोमान्वं द्वादिति शेषः । कांतःप्रियत्त
२१ स्य शंको अस्य वेदस्य अग्रेसरं पुरोवर्त्तिनमोंकारं कुर्याः अग्रीकुरु । वेदस्याग्रेसरत्वादोंकारो भवति । शोत्र श्वंद्वाद स्य
कोत्तोन तथा नलातिरिक्तोमम त्यर्थः । मत्कृतं कंदानवा अग्रेसरं पुरोवर्त्तीयेषु भर्त्तविति रः । अन्नाघ्रेदंत मित्ति पूर्वनिपा
तमकृत्वाऽपशब्दस्यमरनिपातकरणं सप्तमे कवचने न विग्रहमेदं न त्वार्थो । एवं तरद्ग्यसरमित्यादयः प्रयोगा ग अनुः
सरति । अग्रेणवेति समर्थनीयाः ॥७५॥ सखेजिनीति ॥ हे हंससखे । जिन्याः कमलिन्याः मानसरागः अंतः करणानुरा
गस्तस्य वन्तेः सद्भावस्य स्थितेः अनर्केण सूर्यादन्येन सह संपर्के संबंधं अतर्कयित्वा अविचार्य तत्र येमम अन्येन न
लव्यतिरिक्तेन पाणिग्रहः परिणयस्तच्छेकिता तत्र वमहीयोतीव महत्साहसिकं साहसिकत्वं अहो आश्चर्यो सूर्या
२४ तिरिक्तः कांतः कमलिन्याश्चन्नहि नलातिरिक्तो मम मेति भावः । सहसा ऽविचार्यैव वर्त्तते साहसिकः । अज्ञः सहोभ प्रव०
सावर्त्तता इति तक् । तत्तो ब्राह्मणादित्वात्स्यञ् ॥७६॥ पुनरपि द्वितीयं पक्षं निराकरोति साध्विति । हे हंस एतत्त्वया
साधुसम्यकूत्तर्कितं नहितो । किल उपहासे यत्स्वनो त्मनेवस्य श्चया अनलं नलादन्यं संश्रयिष्या किलवेतरस्त
र्थ्यमथ्यर्थेवानलादन्यं संश्रयिष्यतहित्तु पुनः अमुना नलेन विना नलप्रा सभावेस्ता त्मनिविषये स्वप्रहीरं कर्त्तुं २१

स्य०
स्य

तिर

अनलमग्निमेव संश्रयिष्ये। न तु त्वां नृपतो नले मृषा गिरं मिथ्यावाणीं कं कर्तुं नलादन्यं संश्रयिष्ये। त्वं चेन्मां नांगीक
रोषि तर्हि अग्नौ वा आत्मघातं करिष्यतीत्यस्य पुरस्तात्कथयेति भावः। स्वात्मनीति कर्मणि विवक्षया सप्तमी॥७२॥ एतदु
वनं प्रतारणामात्रं न तु सत्यमित्यत आह। हीमहीति। हे हंस यत्तर्कस्त्वां पुनर्मद्विप्रलंभं मया प्रतारणीयं व्याह स तर्कः
४७ तस्य प्रतारणस्य फलं प्रयोजनं तद्विषयिणी वा वि किं मूकः। प्रतारणस्य फलं किमिति न वदति। न वदतीति चेन्नास्त्येव तत्
तत्स्थ अशक्या शंका येषां एवंविधा व्यभिचारहेतवो ज्ञानादयो यस्याः यस्या व्यभिचारकारणं शंकितुं न शक्य
ते एवंविधाः व्यभिचारिणी वाक् यदि वेदानवेदवस्य प्रमाणभूता न भवेत्तर्हि के तु पुनर्वेदाः संतु। अव्यभिचारितवाक्
मेव वेदत्वं। एवंविधायाश्चापि वाचोऽप्रामाण्ये वेदस्याप्यप्रामाण्यं स्यादित्यर्थः। पूर्वश्लोकोक्तं मदुक्तं अन्यथा शंकं
विणा यक्षस्यमेव सात्त्वं। विप्रलंभं यारडुपधादिति यत्। शंक्येति शंकितुं शक्यो इति यत्॥७३॥ पुनरपि पूर्वोक्तं
पितुर्नियोगेत्यादि पद्यद्वयं युक्त्या निराकरोति॥ अनैषधायेति। तंतः पितावेत्तु शरीरशेषां शरीरमात्रावशेषां
मां अनैषधायनलध्यातिनिक्षा पन्नुहोति र दास्ति तर्हि कृशानावेव अग्नावेव किं न जुहोति वक्षावेवमां किमिति
न क्षिपति। वेदेति किमः प्रश्नार्थत्वेन नञो निषेधार्थत्वेन च व्याख्येयं। अंगीकृत्याप्याह। यद्यप्यन्यस्मै दास्यतीति

स॰ ३
नै॰ प्र॰ टी॰
२२

नल।

धापि मम प्राणानां नाथं नलस्त्वं एव। तुरेवार्थे। यतः ह्नेनेनिश्चितं स पिता तत्र जन्मन्यपूर्वं तस्य तनुः शरीरं तस्यैव वई
ष्टे स्वामी। तदधीनस्य शरीरस्य यत्किंचित्करोतु प्राणास्तु नलाधीना एव। पितृकर्तृकंन्यादानेन लोहेशेनाग्नौ ज
न्मांतरेपि तस्या स्पर्शे प्राणास्तस्य स्यामि। यं यं वापि स्मरन्भावमिति ह्यस्मवचनात्। जन्मतनोरिति अधीगर्थे ति
प्रण्णी॥७८॥ इतः प्रपकृष्टार्थयेत्युक्तं द्रूषयति। तदिति। तस्य नलस्यैकं केवलं दासीत्वं तत्र तणे परं वस्तु तस्मा
त्सकाशात् पुरुषे उत्कृष्टे मरीक्षिते मम माभिलाषयेत्त्वं विधिस्तु ताकर्तृकाम त्वं तन्नसाधु वितं। कोच्चौ न साधि
तिवा। नलदासीत्वादन्यत्त्व प्रार्थय इतिभावः। नलस्य दासीत्वं समस्यकृच्छ्रं न्यस्यामहिषीत्वं नेत्याह। नलिनीकम
लिनी सुधा या अमृतस्याकरेणालये नापि अर्हेति नाहेलिः सूर्यस्मादन्येन स्पर्द्धयतिरिक्तेन सुधाकरेणवंदे स्य
णा किंविचन्नेतुरुते अपितु न किमपि। सूर्येन्तु रागवाकुल्याद्वे देतरभावादमृतशर्णोपि तस्यनरोव तेत्वपाम
मेत्यर्थः। सुधाकरपदं प्रथमे यौगिके द्वितीये योगिकमिति न पुनरुक्तिः। तदेकदासीत्वपदस्यक्तनः सका
शादन्येकेमरीक्षिते ते विधिस्तु तात्वीतियत्तत्साध्वपि अनुवितंतादृशस्यमरीक्षितस्याभावादित्यर्थ इ
तिवा॥८०॥ एतदेव द्रढयति। तदिति। तस्मिन्नेव एकं केवलं तत्त्वं अभिलाषुके एवं नृते मे हृदि अनर्थ अमल्पंवि २२

तामणिमपि अनुचितं तादृशस्य मत्तराख्यरत्नविशेषमपि लब्धुं प्राप्तुं चिंतामनोरथो नास्ति। किं पुनर्वांतरमित्य
पर्थः। यतः मम चित्ते सकलत्रैलोक्यां सारभूतश्रेष्ठभूतः वस्तुः वस्तिकलासहितः त्रैलोक्यश्रेष्ठश्चेतिवापद्यावद
मणीयाननः स एव कलत्रएको निधिः स एवैकोऽतः कारणेन मया ध्रियते न चिंतामणिः। अपचयपद्मो निधिर्मुखमा
स्यैस्य एवंभूतो निधिः स एव नन्वनिधिरूपः। किं चिंतामणिं नेति भावः। निधीयत इति निधिः कर्मणि उपसर्गे घोः
किः॥८॥ ममाभिलाषः कर्त्तव्यश्चेन्मदुक्तं अवश्यमेव कर्त्तव्यमिति स्वानुरागपूर्वकं श्लोकद्वयेनेहं संप्रवर्त्त
यति। श्रुतइति। मे निर्वचनीयस्वरूपो नलः मया हृतद्विनादिमुखाच्छ्रुतः। तथा हरिस्तु सर्वासु दिक्षु मोहात् उ
न्मादवशा दृष्टः अस्य सर्वं जगत्तन्मयमेव दृष्टं इति यावत्। तथा नीरंध्रिताविजातीयहानेनाव्यवहिता निरंतराबुद्धिधा
राबुद्धिप्रवाहो यस्यां क्रियायां तथा ध्याता तः ध्यानेन नमो वरीकृतश्च। एवं वक्तुरागादयो न वाव स्याद्यथा यथा मयानुनेतः।
इदानीं मम तस्याप्तिः अस्तु व्ययोऽदृश्यमानस्य रूपः प्राणानाशो वा वा शब्दश्चार्थे वा। एतद्द्वयं तव हस्ते आस्ते त्वदधीन
मेव विधत्तइत्यर्थः। परं तु एकस्यपशेषः एकश्वासोशेषश्चेति वा एकशेषरूपेण द्वयं तिष्ठतीत्यर्थः। यदा नलप्रा
प्तिस्तदा नासुव्ययः। यदा सुव्ययस्तदा तत्प्राप्तिर्न। त्वत्सकाशान्नलं वा मृतिं वा प्राप्स्यामीति भावः। एकतरस्यनि

पर्यन्

स. ३

नै.पू.टी. श्चयाभावाद्द्वयमित्युक्तं। एकशेषः सरूपाणां भवति। न तु विरूपाणां। अत्र तु विरूपयोरप्येकशेष इति चित्रं। अथ च
श्रोतव्यः श्रुतिवाक्येभ्यो मंतव्यश्चोपपत्तिभिः। मत्वा च सततं ध्येय एते दर्शनहेतव इति वचनात् श्रवणादिना पूर्वं वि
षयीकृतस्य तत्त्वमसीति श्रुतेन छद्वाक्याद्ब्रह्मणः प्राप्तिः कस्यचिदेव सुकृतिनः भवति तथा मम नलप्राप्तिस्त्व
त्प्रसादादेवेत्यर्थः। व्रतान्यपि अद्वयां। अथ च एवंविधो य एकस्य शुद्धस्यैव ब्रह्मणः शेषोवस्थानं तत्त्वज्ञतामद्वयं वे
त्युक्तिः। अत्र वा शब्दश्चार्थः। द्वयमेवेति पाठे वा। ध्यातः न ध्याताव्यत्तिनत्वनिषेधः। नीरंध्राकृता नीरंध्रितेति एषेता
न्निष्ठा। (२२)। मम मत्कार्यसाधने तव महान् लाभ इत्याह संवीतां। तदप्यवेहि त्वशयेशयालु इति आश्रुतस्य प्रति
ज्ञातस्य पालनेन तस्माद् उच्चैर्जनितं पुण्यं तथा मम प्राणानां मम द्वयमेव विश्राणनेन दानेन तज्जनितं च पुण्यं त्वया संवी
यतां परिपुष्टीक्रियतां। प्रतिश्रुतकरणेन महान्धर्मः ते नवमस्याप्राणरक्षणाद् धर्मो भविष्यतीत्यर्थः। प्रतिश्रुता
दानेन वा धर्मः प्राणत्राणहानिश्चेति स्त्रीहत्यालक्षणश्चाधर्मः। एतद्द्वयं यथा न भवति तथा कर्तव्यमिति भावः। नि
श्चयाभावे कथं कार्यमित्यत आह अर्थेशु बुधा निःकारणिकापि तु नियोगे स्यादिति मम कार्यसाधने तव महान् लाभ
इत्याहाशंका विरुद्धासंभावनानि वार्यतां दूरतस्स्वयं त्यक्तो अयेहं संभदे दिप्यासंदिग्धेपि पदार्थे विषये भिन्नशमति २२

८३ शयेनकेयं मुद्राम्रकी भावः किमिति नांगीक्रियते इत्यर्थः भद्र शुभ रूपे श्रेष्ठसाधो वार्त्तीयं इयं कामुद्रास्थितिरि
तिवा। अलमिति हे प्रियवित्तप्रियप्रश्नो सो वित्तश्च विघ्नुपत्ति घुमध्ये तयति श्रेष्ठ इतिवा। हे सथा श्वोमत्स्तो प्रार्थनां वि
लंघ्यातिक्रम्यालंनातिक्रमणीया। प्रियस्यसतो विहस्यनलस्य याञ्चां विलंघ्यालमितिवा। तथा विधे यकरणीय
वस्तु विषये विविधं वाम्ये वक्रत्वमपि कृत्वालंन करणीयमित्यर्थः। अपि स्वकल्पकालत्वघोतनार्थः। उभयमपिन
कार्यमित्यर्थः। तथा आश्रवता पदं रात्रत्वलसत्पदं उत्तमं स्पर्धनं तस्मात् दुःखेउत्पन्नस्तस्मा घशःप्यातत्कीर्त्तिमा
र्गी तत्सवलित्वापतित्वापि खलु पूर्यतां पतनमपिन कार्यं अपिशब्दो त्रापियोज्यः। किंभूता तस्त्रस्तः स्त्रिग्धः खलो लक्ष्मीनां
खलदुर्वचनानां खेलो विलासो यस्मिन्। हंसतुल्य उपकारी अन्योनास्तीति दुर्जना अपि यथा तत्वे कीर्त्तिं वर्णयं ति त
था कुर्वित्यर्थः। आश्रवता श्रवनकारिता प्रतिश्रुतकारित्वमितिवा। एवं धाहि परो च्छो भवति। विद्गेति इगुपधतिकः। वि
लेघ्य कृत्वा स्वलितेति अलंखल्वोः प्रतिषेधयोरिति क्त्वाप्रत्ययः। आश्रुणोतीत्याश्रवः पचादिषु। यनयावेतिनेड्
यश्चा॥ ९८॥ सोपहासंब्रूते॥ खेति। हे हंस मदीयानस्त्रलल्लतणभ्रात्मामम्हामेवादिरसो दीनमनिष्ठो इदृशः अ
भिनवश्चा सौवद्दमुष्टिश्च कृपणशिरोमणि। स्तस्य तव आर्त्ती दीनानां मुदे हर्षाय स्वजीवमपि स्वप्राणमपि र्द्दद्य

नौ

स॰ ३

नै॰ टी॰ जीमूतवाहनादिभ्यः सकाशाद्यद्यस्मात्पालनं जीवनं भवति। तस्मात्तवकरात्कीर्त्तिर्धौतो यशो धवलो धर्मः भ्रश्यति
त्र खुनैव विनश्यति। यशो नश्यति धर्मोपीत्यर्थः। अन्यदीयं गृहीत्वा तस्मै यो न ददाति तस्य त्वज्जीवदातृभ्यः सकाशा
२५ त्रज्ञाकर्षं स्यात्। यदि स्यात्तर्हि विवरे वा तस्मादुभयमपि तव नष्टं। ते तु जीवमपि ददुः त्वं तु तदीयमेव धनं ददासि
किं पुनः स्वीयं जीवं। तस्माद्धनधर्मौ यशश्च भवति तदेव कुर्विति भावः। वद्भुमुष्टेः करात्पततीति विरोधाभासः।
नेति का कुक्षौ करो स्त्ववंशीवि विमर्षः संजीवं जीमूतवाहनः। दधीचिर्दधी विवस्यन्ती निकिमदेयं महात्मनामिति त्वव
नं जीवदाने प्रमाणं। न लोके ति निषेधाद स्त्र निति च्छितीया। धौतः धावे निष्ठायामूटि रूढि गा।।८९।। त्वया मत्का
र्ये कृते प्रत्युपकर्तुमशक्तत्वेनाहं अधमर्णो यथा स्यां तथा कुर्वित्याह। दत्वेति।। हे हंस जीवदे प्राणदे त्वयि आ
त्मनो जीवं दत्वापि मुक्ष्यामि अनृणी भवामि। जीवाधिकं न लं ददाति तस्मिंस्त्वयि। केन तु केन पुनः प्रकारेण मु
क्ष्यामि। केवलजीवदत्वे तु जीवदानेनानृणं भवनं युक्तं। जीवाधिकदत्वे तु जीवदत्तेप्यनृणा भवितुं न शक्यते
जीवाद्भ्यधिकं अन्यत्किमपि न विद्यत इति भावः। यतस्तस्मात्त्वद्दणान्यशो द्रुमन पाकर्तुं मोऽमुद्दो निर्मर्यादः
दारिद्र्यसमुद्रस्तत्र मग्नो अतिदरिद्रो विधेहि त्वावधमर्णो यथा स्यां तथा कुर्वित्यर्थः। जीवाधिकदो न वेति भावः २४

ऋण। शब्दस्त्वत्रोपकारपरः। अशोधनं प्रत्युपकाराकरणं। अत्र चैमी जीवितीशब्देन गृह्यते। प्राणेभ्योऽप्यधिकं न लंहर
ती। इति जीवाधिकः। एवंविधेत एव त्वं जीवदेन लदा न लदान एव मम प्राणा नैयतः एवंविधे त्वयि आत्मनः प्राणान् दत्वापि आत्म
जीवदायसाध्यमुपकारं कृत्वापि केन पुनः प्रकारेणानृणत्वं भवाम्यपि तु प्राणाभयदायसाध्येऽप्युपकारे कृतेपि ममानृणत्वं यतो
न भवेत् इति वाक्यार्थः॥८६॥ अस्मिन्कार्ये कृते फलसद्भावेन लब्धे तत्करणीयमित्याह। करणीयेति॥ हे हंस त्वं मज्जीवितं जी
वेम वपणं विक्रेयं वस्तु विक्रीणीष्व यदि यदानमल्पेन तिशेषः। मत्यमेव ते कुर्येण अयस्त्र। ननु तुभ्यं कृपेण जीवदानेन मम
को लाभ इत्याशंक्य आह। अन्यद्धनादिकं वेद्यद्यपि न अस्ति। तथापि पुण्यमस्तु भवतु। जीवितदानेन जीवाधिकदाने च जीवा
धिकदानेन विनान्यन्मूल्यं यद्यपि न विद्यते तथापि तस्य स्या। नेश्रेय एव भवति इत्यर्थः। ननु पुण्यं पारलौकिकं अहं ऐहिक
मपि किंमपि वांछामीत्याशंक्याह हे जीवेशदातः प्राणनाथदानतः जीवाधिकतुल्यमूल्याभावेन यद्यपि ते तुभ्यं दातुं न
३४ प्रभवामि समर्थास्मि तथापि तव यशस्तावत् आकल्पं न प्रपमलोवागन्तुं समर्थास्मि। प्रभवाम्येवेति तावच्छब्दो वधारणार्थो वा (ग)३
ऐहिकं पारलौकिकं च फलं तव विद्यते तद्रूपेणमूल्येन मह्यं जीवदानं कुरु इति भावः। यद्वा तावत् त्वत्कीर्त्यर्थं यदि ते दातुं न प्र
भवामि तर्हि यशोपि यशः पुनर्गन्तुं न प्रभवामि अपि तु प्रभवाम्येव। पण्यं पराणपादेत्यादिनाः हार्द्यर्पयत॥८७॥ पूर्वोक्तं

५३

०६

नै॰पू॰टी॰ फलद्रूपा मा वेधि साधवडप कुर्वती त्याह। वराटिकेति। अपेवेति सर्वो त्कापरितोषस्याः धनिकां धन लुब्धा एवेत्यर्थः
२५ वराटिकोपक्रियया कपर्दकदानमात्रोपकारेणापि लभ्यास्सुलभा त्वत्कृतज्ञान्ना। पूर्न नाद्रियंते न संमानयंति ऋासेन कु
र्वती त्यर्थः। तुःस्त्रुनरर्थे। हंता श्चर्ये। संतस्तु साधवः पुनः प्राणैरपरौ मूल्ये स्ताने वहत्कृतज्ञानं क्रीणंति विक्रयेणगृह्णं
ति। कृतज्ञोपकाराये प्राणानपि त्यक्का तानर्जयंती त्यर्थः। किंभूताः संतः स्वमात्मानं निपुणं कुशलंभणंतः ब्रुवंतः
मानयंतः। प्राणाधिकं मूल्यमर्हत एते स्माभिरल्पेन प्राणमूल्येन लब्धा इति वयं कुशला इति संतुष्यंति। अतः फलाभा
वेपि साधुना त्वया कृतज्ञा हं विक्रेतव्याम त्वं जीवदानं कुर्विति भावः। एतेन तपस्विशोर्यवायस्य नपयितंयशः। विघाया
मर्थलाभेवा मानुकूल्यावसरएष वसइति। इम्य आद्यो धनीत्यमरः। इभमर्हतीति दंडादित्वाद्यः॥८१॥ वलात्कारेणापि वनेन
लोयावनी यदस्तु किंचिविशेषेण हा॥ सरति। पतः संभ्रमत्वराजानलः अपेण वपि लोकपालाः लोकपालोशस्यांतएवासावित
र्थः। अतस्तस्मिन्नलएवएकाग्रा निश्चिता धीर्यस्यास्तस्याममतेलोकपालैः प्रसेदेप्रसन्नीभूतं। नलस्यतदं शत्वात्तेममभक्ता
याः प्रसन्ना जाताः। प्रसन्नत्वेऽन्यथानुपपत्तिं प्रमाणयति। हियस्मात्वंएत्यागत्यपत्स्त्वयमप्रेरितएवममयत्सातिभूर्नलप्राप्ति
लग्नकेभूः जातोसि। तदप्यवेहि स्वशयेशयाल्वित्यादिना। तल्लोकपालप्रसादस्यातिरेकेण नघटते। लोकपालैर्ममविश्वा २५

सार्थत्वं लग्नकः कृतः। अतस्त्वामेव नलं याचे। लोके प्रतिभूरेव पीड्यते। धनिकाधमर्णयोरंतरे स्थितत्वात् प्रतिभूरित्यत्र भुवः सं
ज्ञांतरयोरिति क्विप्॥ ४९॥ नलदातृत्वं विनात्तवानैश्चित्यमेव स्यादित्याह। अकांडमिति। अकांडमेव अप्रस्ताव एव कौमार
एव आत्मभुवा कामेन अर्जितस्य ममपि जनितस्य रागस्य शाठ्यस्य रहस्य कथनस्य अलंकारतां भृत्वापि विधिः प्रतीभवान् नलल
दत्त्वं नलस्य दातृत्वं एतत् प्राप्य मे हृद्दग्धं दहनस्य लेपकृत्यं गरागकार्यं किं न कर्त्ता। मम हृदयं नलरूपेण न शीतलेन विरहसंतापरहि
तं किमिति न कुरुषे। एवं तावत्कर्त्तुं युक्तं। अन्यथा त्वया रहस्यकथनं किमिति कारितं तेन नलं देहि। भवेतिभावः। कामपीडा
कौमारे न युज्यते किंतु तारुण्ये। मया बालत्वे कामपीडा कथिता नलमुद्दिश्य। तत्र कारणं त्वमेव जानासीत्यर्थः। अकांडं श
ररहितं यथा भवति तथा कामजनितस्य संग्रामस्य मिदानीं भृत्वा नलप्रस्तावात् इति वा। अथ च अकांडं पर्वरहितं ब्रह्मणाम
पि निमित्ते शरण्यस्य वीरत्वाणस्य मलं भृत्वा नलदत्त्वं उशीनरनृपतां प्राप्य संतप्तस्य हृदयस्य चंदनलेपेन यत्कृत्यं शीतलत्व
रूपं कार्यं किं न कर्त्तासि काकुः आक्षेपो वा। तत्रापि नलरत्वा हृदग्धं दहनलेपकृत्यं युक्तमेव नलघातोऽवदाहं हृदग्धं दहनलेपं
करिष्यामि नान्यथेति भावः। स्याद्धीरणां वीरत्वणं मूले स्यो शीरमस्त्रियां। अभयं नलदमेव्यमित्यमरः। कृत्ये विधा कष्टधारि
ति कृतः कपि तुक्॥ ५०॥ शीघ्रमेवैतत्कर्तव्यमित्याह। अलमिति। हि यस्माद्यं त्वरितं तुल्वरां कर्तुं विलातोऽत्कार्यं कर्त्तुं श

स·३

नै·सू·टी· घ्राणंतुमयंसमयः अनोविलंब्यअलंविलंबेनकार्यः। तूर्णंविचार्यकरिष्यामीत्यत आहकिलयस्मात्तस्यैर्यसहेविलंबसहेका
र्यविषयेविचारःक्रियतइतिशेषः। इदंतुविलंबसहंनभवतीतिविचारोनयुज्यतइत्यर्थः। तत्रहेतुमाहअर्जितस्तीस्तागपीडाप्रभु
तिविरहपीडा तत्कदाचिदपिकालेनप्रतीक्षते। तत्रदृष्टांतः। काकमिवतीक्ष्णानुशाग्रतुल्याशिष्यस्यप्रतिभात्रज्ञानगुरूपदे
२५ शमिव। गुरूपदेशास्तूर्वमेवंशाअत्रार्थंगच्छतीति। लोकेपियावद्दिवादिसमयःसमायातितावत्पूर्वमेवत्वराभवतिशीघ्रमेतत्का
र्यंसाधयेतिभावः। चरितुंकालसमयावलेनितुमनः॥२१॥ श्लोकवत्तुएंयेनवितापनावसरमुयदिशति। अभ्यर्थनीयइ
त्यादिना। इतोगतेनत्वयाप्रभुक्षांतगतोऽयंवरोधमरूप्यपितःसराज्ञाभैमीत्वयानुग्राह्येतिमदर्थनाभ्यर्थनीयःमद्विषयंकि
मपिनवक्तव्यमित्यर्थः। गतेनत्वयाभ्यर्थनीयःपरंप्रभुक्षांतगतोनेतिवाएवंअस्मिन्श्लोकत्रयेपिविशेषणस्य— जामेवंधन्
कार्यः। यस्मात्तदातस्मिन्समयेप्रियाणांआस्यानोतेषुवा [illegible]स्यानुरोधस्यवलादाधिक्यात्ततः अन्यवधूनिषेधः
अन्यस्त्रीनिषेधःउदयेतप्रादुर्भवेत्। यद्यप्यन्यस्त्रीकासनाऽस्यस्यात्तथापितत्समर्थंप्रार्थितेनमुखावलोकने
नजनितयालज्जयाप्रीत्यावाएतास्मःसकाशादन्याकापिसुंदरीनास्तीतिनिषेधउदयेतइतिहेतोर्नप्रार्थनीयस्तत्त्वदर्थः।
प्रभुक्षांतप्रावरोधश्चेत्समसः। अर्थलज्जयावने॥२२॥ प्रभुक्षांतेति। त्वयाप्रभुक्षांतसंभोगेनांशःपुरस्त्रीसुरतेनमितोननुएं २५

शांतकाम इतियावत् नलेइदं पूर्वोक्तं कार्यं ननिगाद्यं नवक्तव्यंसेति सज्ञ[illegible]॥ हियस्मात्स्वां अद्भिः स्नातपुरुषायत्वाडुःसु
रसासुगंधिः कर्पूरादिना तुषाराशीतलाच वारिधारा उदकधारा नरो वर्ते[illegible]त्या सा या अभावात्पीत्ता डुरकाडुत्लुएमप्पुर
कं यथा तस्मिन्नरो वर्तते तथास्मं भोगे न शांतमदनत्वात्तद्द्वयोः प्रधिकाहं तस्मै न रोचेय। तस्मात्त्वरापि नवक्तव्यमिति भावः।
निगाद्यं सोपसर्गाद्गदतेर्ण्यत्। सुहितार्थयोगे पूरणगुणेति षष्ठीसमासनिषेधात् वा पामितिषष्ठी। तृप्त्यर्थानां करणे ष
ष्ठीवेतिवा। तृप्तायरूच्यर्थानामिति चतुर्थी॥ सुगंधिरिति गंधस्येत्वे। तुषारेति अभिधेयलिंगत्ता। [illegible] त्वयेति। हे हंसकुलाव
तंस हे सर्वंशाभूषण नेषधस्य हृदि क्षुधा क्रोधेन कडुस्पूई षत्त्वे सति मदर्थामस्त्रयोजनागिरो वाचः त्वयाननिधेयाः कर्त्त
व्याः। यतः पित्तेन पित्तदोषेण रसनेरसनेंद्रिये दूने दूषिते सति सितापि शर्करापि तिक्तायतेतिक्तेवाचरति निंबतुल्परसा
भवति। अहं शर्करा तुल्या तां किमित्यर्थः। शार्करा सितत्यमरः। कवेचोष्णे इति चकारात्कडुस्तः। रस्यतेऽनेनेतिरसनो इति
क्तेवाचरतीति कर्तुः क्यङ् इति क्यङ्। तिक्ता भवतीति वार्थलोहितादित्वात्क्यष्। वाक्यषइत्यात्मनेपदे। [illegible]। षवेति। हे
हंसत्वया धरायां भुरा पाइं ईड्डस्तत्मिष्ट पृथ्वी ईड्यत्ले पूर्वोक्तव्यतिरिक्तकार्यांतरं चुं विकार्य मात्रास त्तोविज्ञंयस्यएवं भूतेत
सतिमदर्थया ज्ञानकार्यविधेया। यतः तदाकार्यांतरासक्तिसमये अर्पितस्य याचितस्य अनवबोधः अनाकर्णनेतदुष्णं

न२

स॰ ३

नै॰प्र॰टी॰ निद्राऽवज्ञाया अवहेलनायाः आचरणं कारणं तस्य मुद्रां सादृश्यं बिभर्त्ति धारयति। असमये कार्यांतरासक्तत्वात्तव विज्ञा
२७ पनीयं दिनं भुक्षुया त्वदाहृतं कार्यमस्मै नरोचत इति विचार्यते वापि पुनर्विज्ञापनायां बुद्धिर्नोदियादिति भावः। तुरासाहि
ति प्रयोगो भाषायां छंदसि सह इति ण्वि प्रत्ययस्य छंदसि विहितत्वाच्चिंत्यः। गिरिशादिवन्महाकवि प्रयोगादस्यापि छांद
सत्वस्य प्रायिकत्वाद्वा परिहर्तव्यं। प्रकारांतरं तु परान्तुराषा रावस्ते प्लीव दन्तुराश्च तुत्रालो आधेगवांसा पूर्वोक्ता प्रसिद्धा
वाया च्वा विशेषणं। हि निश्चिते अन्यत्सर्वं वत्। धरखवर्वतवद् तुरा वा। त्वस्य न समयं दृष्ट्वा कर्तव्यानसौ तालेनेत्यर्थः। य
द्वा हे अहिमर्दर्प अहीनमध्नातिअहिमत गरुडस्तमर्पयते मित्रत्वेप्राप्तुं प्रार्थयते तत्संबोधनं गरुड तुल्यपराक्रमे
७ अ त्यर्थः। न्यत्सर्वं वत्॥ ८५॥ निगमयति विहितेनेति। हे हंस तस्मात्कारणात् त्वं अस्मिन्नरेंद्रे विहितनविशेषहेतेन त्वया समयम
वसरे समीक्ष्य दृष्ट्वा इदं कार्यं विज्ञाप्यं विज्ञापनीयं। असमयप्रतीक्षणे कार्यविलंबः स्यादित्याशंक्याह अस्य कार्यस्य आ
त्यंतिकी सर्वथा असिद्धिस्तथा विलंबिनी सिद्धिस्तयोर्द्वयोर्मध्ये आर्यस्य पूज्यस्य बुद्धिमतस्तव का सिद्धिः शुभा समीची
ना विभाति प्रति [illegible] भाति। कथयेति शेषः। असमये विज्ञापितस्य कार्यस्य सर्वथा असिद्धिरेव। समयं विचार्य कृतस्य विलं
बेन सिद्धिः सैव ज्यायसी तस्मात्समये प्रतीक्ष्य विज्ञप्तिं कुर्विति भावः। आत्यंतिकी वा सा वसिद्धिश्चेति कोपपत्ति पुंवत्क २७

मधारयेत्ति पुंवत्‌। लक्षणहेत्वोरिति शानप्रकारत्वात्तु रमित्यस्यानित्यत्वादात्मंतिकासिद्धिविलंबिसिद्धारित्यत्रप
र निपातः समर्पणीयः॥२६॥ बाला याप्तरुणी वल्लज्ञा त्यागेन युक्त इत्याशंक्यपरिति। इतीति। विना मुना त्यां त्वमनी
त्या धुक्तवत्या भेभ्याय ज्ञात्वा अलोपित्यक्तासा अनो वितीअमौवित्यं नोस्माकं कवीनां चेतसि चकास्ति प्रकाशतां। बाला
या लज्जया भावमेवेति तत्त्यागे स्यत्क्ति द्धोता तिकमार स्माकं चेतसि अनौवित्यं स्फुरतु नो मत्यर्थः। तुः पुनरर्थे। तद
द्दाष्टतायां निर्दिष्टत्वे पुनः स्मरः साक्षी साक्षाद्द्रष्टा कवीनां वर्णनैः नौवित्यं प्रातिभासिकं न तु तात्विकं अनुवादत्वादि
ति भावः। शष्कर्मत्वा द्वदराप्येतक चूर्णौ कर्मत्वां॥२७॥ मदनेनापि साकमित्युन्मादितेत्यत आह। उन्मत्तमिति॥ द्वौ उ
न्मत्तं उन्मत्तवस्तु आसाद्य प्राप्य असीमां निर्मर्यादां मुदं हर्षं उद्वहेते धारयतः। द्वौ कौ हरो महादेवः स्मरश्च। तयोर्मध्ये
पूर्वो हरः प्रसन्नं धत्तूरपुष्पलक्षणमुन्मत्तं प्राप्य हर्षं धत्ते। द्वितीयः कामः विरही। विना विरहपीडया हृन्नं दुःखितमुन्मा
द्रवंतं जनं प्राप्य हर्षं धत्ते। ननमुत्प्रेक्षा। उभयत्र हेतुः परस्परद्धितया अन्योन्यस्पर्द्धया। हरशत्रुः स्मरः हरस्य उन्मत्तं ध
त्तूरकुसुमं हर्षजनकं दृष्ट्वा मयापि उन्मत्तं जनं प्राप्य हर्षितव्यं। तथा हरेणापि कामं उन्मत्तं प्राप्य हृष्यतीवन्मयापि
कामायुधमुन्मत्तं पुष्पं प्राप्य हर्षितव्यमिति अन्योन्यस्पर्द्धा। शत्रोरस्त्रादिलब्धा सर्वोपि तुष्यति। कामोपि उन्मत्तं पिशाचं हरसे
६४ कर्पसाद्विमित्यत आह। यः कामउन्मादयउन्मादावस्थां कृत्वा तां नेमी तत्र दिनाम्रु नेत्या द्विवार्त्तया युक्तमयुक्तं अवीवदत्त्वादयतिस्मते नैवबला
द्वौ दित्‌ तामेतितस्यानदोषः ९

नै-पू-टी० वकमाला द्यहर्षं धत्तां शत्रुवत्कलानादित्यर्थः उन्मत्त उन्माद इव निधूनमुं चुकुंदयेति विघ्नः॥ ९८॥ तथेति। अथ
अनंतरं तेन विहायसा पतत्रिणा स्वानीप्सितसिद्धेर्विहस्य वंचू पुरस्य मौनमुद्रा मौनमुद्रा मौनभंगिः भयः पुनरपित्र
२८ मा वित्यक्ताव कुं प्रारब्धा किंकृत्वा तथाभिधात्री श्रुतश्च दृष्टश्च त्यादिना प्रमाणं तां राजपुत्री भैमी नैषधे नलेव स्नेहरागः
प्रीतिर्यया एवंभूतां निर्णीय निश्चित्य। विहायश्चाशंकुं ते स्यादिति विघ्नः॥ ९९॥ इदमिति। हे क्ष्मापति पुत्रि राजपुत्रि य
दिदं पूर्वोक्तं सर्वं तत्वं सत्यं तन्न हि अस्मिकार्ये स्वस्य आत्मनः विधेयं करणीयं न पश्यामि। मया करणीयं किमपि नाव
शिष्यते। तर्हि त्वां विना स्वयमेव कपं भविष्यतीत्यत आह त्वां नृपं नलं च उच्चकैरतिशयेन तापयता उभयोरपि परस्प
रं रागात विरहपीडां जनयता पंचेषुनैव कामेनैवं योजना घटनाश्रजनि जनिता॥ अतएव मम व्यापारोत्र नावशिष्यत
इत्यर्थः। तन्नयोः संधिरिति लोहादौ दृश्यते॥ १००॥ नेम्यवस्याः श्रुत्वा नलस्यापि कांचिदवस्याः स्वयमाह॥
त्वदिति। हे भैमि तयोर्भिः पुत्रपैरपत्वां लब्ध्वा प्राप्य अमृततत्वंपी पूर्वपान जनितत्तत्पितृतुल्यत्वं द्विजो तस्य नलस्य वहि
रिंद्रियाणां चक्षुरादीनां केवलानां त्वद्दैवभयं आदित्यश्चक्षुर्नेत्वात्तिग्मांशुविशक्तिपा दिश्रुतिसिद्धेस्त्वीयं देवत्वं च
रितार्थं कृतकार्यमस्त्वा एतावत्कालं शब्दमात्रेणातेषां देवत्वमभूदिदानीं त्वद्दर्शनेनामृततत्पितृतुल्यत्वाद्देवत्वं सार्थ २८

कैश्च विधत्तीत्यर्थः। किंभूतस्य तस्य त्वय्येव बद्धा निवेशिता बुद्धिर्मनो येन अनशननियमवतश्च। किंभूतानामिंद्रियाणां म
नसस्त्वयि लग्नत्वात्तेषु मनोव्यापाराभावात् उपवासव्रतं विद्यते येषां। चान्यस्यापि आहारेंद्रियस्यानशननियमवतः प
रब्रह्मध्यायतः पुण्यैस्तद्देवब्रह्मलब्धा मोक्षलक्षणानंदभाजो देवत्वं सार्थकं भवतीत्युक्तिः। बहिः इंद्रियाणां निजव्या
पारेषु प्रवृत्तिस्तपः विषयभोगाभावश्चोपवासः। अमृतपाने हि देवानां देवत्वं तथा त्वद्धामेंद्रियाणामपि देवत्वं ल
तार्थमत्तः। देवभूयं भुवो भावे क्यप्। उपवासश्चासौ व्रतं चेति कर्मधारयादिनिः समर्थनीयः। उपवासेन व्रतिन इति स
माधिः।।१०१।। नलस्य तद्विरहेण कामजनितं विरहज्वरमाह। तुल्येति। हि भैमि अतनुः कामस्त्वद्विरहात्तस्य नलस्य देह
तापं विधत्ते करोति। किं कुर्वन्निव इति शर्वोक्तप्रकारेण अस्मात्स्पर्धयन्निव ईर्ष्यां कुर्वन्निव इति किं। आवयोः कामनल
योः स्मर्त्रोः शरीरं पूर्वं तुल्या समाना अभूत्। अनंतरं मदीया स्मर्त्तिर्दग्धा अस्य नलस्य स्मर्त्तिः परं अतिशयेन ताप्य
ते पिनए तच्छरीरस्य दाहो न क्रियत एव परं संतापोपि केन विन्नक्रियते इति अनेगस्त्वद्विरहाद्देवदेहतापं करोति नान्य
स्मादित्यर्थः। मम तस्य च आवयोः। त्यदादीनां मिथ इति एकशेषः।।१०२।। दृशौ वर्णयति। लिपिमिति। स नृपो नलः
दृशा दृष्ट्वा भित्तौ विभूषणमलंकारभूतां लिपिं चित्रनिर्मितां त्वां आदरेण तात्पर्येण निर्निमेषचक्षुर्नेत्रसंकोचरहितः स

यावच्छेदे न सहममेदमिति इदमस्मन्मङ्गल्यमिदं मङ्गल्यमिति अहमहमिकया विवादः कलहः आसीत् भवति अनुरागवशान्निमेषाभावो भवति
स॰३ नयनानुरागजन्यं निमेषच्छिदा अन्य ५

नै॰पू॰टी॰ नृपमिव सादरमवलोकयत्तव चक्षुर्नैर्निमेषत्वादनुरागवशाद्बलान्नेत्रं वाष्पप्रवाहैरर्पितं जनितं आत्मव स्वरागं स्वीय
नयनयोर्लौहितिमानं धत्ते। उत्प्रेक्षते त्वया रक्षितमिव जनितमिव। अयं वाष्पजनितलौहितिमा न भवति किं तु त्वद्विषयको
नयनानुरागः प्रथमावस्था॥१०३॥ तामेव पुनराह॥ पातु इति। आलेख्यमयी चित्रलिखिता त्वां आदरात् हस्तनिर्लया मी
निर्निमेषया दृशा पातु सादरमवलोकयितु नृपस्य अश्रुणि विषयेनेत्रवृत्तेर्नयनवर्तिन्याः प्रीतेरनुरागस्य निमेष
छिदः जन्यमेतदश्रु इति लोकः संदिग्ध इति भावः। निमेषछिदेत्यस्य प्रधानेन तृतीयामुख्या नयनप्रीतिरिति घोतितं
तिहासाधुः॥१०४॥ द्वितीयामाह। त्वमिति। हे भैमि वहिर्गतापि वहिः प्रदेशे वर्तमानापि अनुरागवशादंतःकर
णे विद्यमाना त्वं कयापि ताकेन प्रकारेण प्राणायिता जीवायिता नासि अपि तु सर्वप्रकारेण जीववत्प्रियासि। अथ च वहि
र्गता त्वं नासि कया अस्य गत्या मुखगत्यापि हृद्गता मनोरमा तत एव प्राणायिता प्राणवत्प्रिया। तव नासिका मुखसौंद
र्यविचित्रा दोर्दृस्वा तेन हृदये धारितेत्यर्थः। वहिर्गतापि हृद्गतेति विरोधाभासः। नस्पर्त्वात्परिहारः। प्राणा अपि नासि
कामुखमार्गेण द्वादशांगुलपर्यंतं वहिर्गत्वा पुनरंतः प्रविशंति प्राणा स्वांचलमेतेत्यर्थः तथा त्वमपि। भवती त्वमेकाके
वलान्तर्जीवीव नापायायस्येवेरतमनोनलौतः करणं चित्रमालेख्यं यत्र आक्रामति तच्चित्रमिव भवति तत्र विषये आश्च २८

र्यं। विरहव्यथया हि विवशबलेन भवितव्यं तद्वयदा चित्रमिव निष्यापारं जातं तत्राश्चर्यमित्यर्थः। त्वदायत्तत्वात्त्वदन्यत्कि-
मपि तस्य चित्तेन लगतीति त्वद्धाएव स्त्रियेत्यर्थः। चित्रं कर्तृ एतन्मनः कर्मयन्न स्वाधीनं करोति तत्र चित्रमपि तु नेति
कौतुकं। यतस्त्वदेकवृत्ति। इति वा। भवदेकवृत्ते तन्मनो यच्चित्रं नाक्रामति अर्थान्नावलोकयति तत्र चित्रं। चित्रं हि सर्वै-
रप्यवलोक्यते अनेन नेत्याश्चर्यमिति वा। एतन्मनो यच्चित्रमाक्रामति अवलोकयति तत्र चित्रं न। यत यद्यपि चित्तं हि-
तः चि[illegible]त्रं दुःखदं तथाप्याश्चर्यं न श्चित्रं भवदेकवृत्ति भवत्याः एवेकारवृत्तिस्वस्थानं यत्र एवं विधं। यत्र त्वमेव लिखि-
तासि तदेव चित्रमवलोकयतीति अत्र किमाश्चर्यमिति वा। चित्रमिति पाठे व्याख्या। तत्र प्रातीभवनेलोकस्य चि-
तं आश्चर्यं न गच्छति यस्मादेतन्मनस्त्वदेकवृत्ति त्वदासक्तं। यस्य यत्रासक्तिस्तत्तस्य प्राणवद्भवति अत्र किमाश्च-
र्यं। इति द्वितीयावस्था। आक्रामतीति वा प्राप्नोतीत्यप्यर्थः विकल्पः भवत्याः एकारवृत्तिर्यत्र सर्वनाम्नो वृत्तिमात्र इति भव-
ती शब्दस्य पुंवत्॥५॥ तृतीयामाह। अजस्रमिति। त्वं दूरदीर्घमतिमहत्तीं तदीयां नलसंबंधिनीं संकल्परूपां तापा-
नततिं तापानपरे परीभेमी प्राप्तिः कथं भवेत प्राप्नोसत्यां अहमेवं करिष्यामि इत्या एवं करिष्यतीत्येवं रूपो मानस-
विचारलक्षणां अजस्रं निरंतरमारोहसि त्वत्प्राप्त्युपायादि सर्वदा विचारयतीत्यर्थः। यस्तु नः स नलः अधिकमत्यर्थं भ्या-

स॰३

नै॰पू॰टी॰ सान्नु निश्वासान्वर्षति मुंचति तन्न बुधानाचिंतनात्वन्मयतां त्वत्सायुज्यं आप्य प्राप्य त्वद्ध्यानो भवत्वात्वय्यनुरागवा
३० हुल्यात्वच्चिंतनात् लत्वप्राप्तेरभावादुःखवशादत्यर्थं निःश्वासान्मुंचतीत्यर्थः। योतिदीर्घो सोपानपंक्तिमारोहति स
निश्वासान्मुंचति अत्र तु विपरीतमित्याश्चर्यं। तत्र त्वद्ध्यानात्वन्मयत्व प्राप्तेः श्वासप्रश्वासाधिकरणत्वाभावात्संगच्छते त्वद्ध
र्मो नले युक्तं तेन स्मात्त्वत्सायुज्यं तस्य ज्ञातमित्यनुमीयत इति भावः। अथ यया ये ध्यायति स तन्मयो भवति येन प्रभा
ला वात्मयज्ञादो ज्ञानो विष्णुमयो स्फुरदिति विष्णुपुराणे। आरोहणं स्यात्सोपानमित्यमरः। आप्य त्यत्रा डांसमासः त
तीयावस्थानेनाभ्यमयत्त इति। ६॥ संकल्पमेवाह हृदीति॥ तस्य नलस्य हृद्देत हृत्करणे १ हए कोलेय त्वां मंत्रयते त्वा
मुद्दिश्य गुप्तं यद्भाषते नेमीप्राप्य तां प्रत्येवं वदिष्यामि त्रालिंगनादिकं देहीति गुप्तं विचारं करोति मुखं नलमुखं
कर्तृ तद्गुप्तभाषणं कर्मव्यक्तं यत आमंत्रयते भाषते। मुखस्य पांडुता म्लानतादि गुणं दृष्ट्वा त्वामेव ध्यायतीति व्य
क्तं ज्ञापयत इत्यर्थः। पातन्मुखस्य नलमुखस्य तद्धरीन लवैरी पुष्पायुधश्च कामस्तस्य मित्रं वैद्यस्तेन सह यस्त्वमे
त्रीतस्यो चितिमव लुनिश्चयेउत्य त्यायोवा। वेंद्रतुल्यत्वात्त्वन्नलमुखं चंद्रमित्रो नलः कामस्य शत्रुः पीड्यमानत्वात्त्वं चंद्रो
पि मदनमित्रं तद्वृद्धिकरत्वात् मित्रं वमित्रस्य कार्यं करोति न लौ मंत्रलक्षणं शक्तिं प्रयुंक्ते। नल एवं विधं मंत्रं क ३०

रोतीति नलस्याक्रमे मदनस्याग्रे मदनमित्रेणाकथनीयं। नीतिज्ञा हि मित्रेणापि रिपुमंत्रभेदं कुर्वंतीति तद्वंद्रमित्रेणानलमु
त्वेन कृतमिति भावः। मुखे पांडुत्वादिगुणदर्शनेन तं रतिशयेन त्वमं मदनस्याग्रे मदनमित्रे द्विधयाविर्तां करोतीति तस्य
एं ज्ञायत इत्यर्थः। स ज्ञस्मयर्थे रहोव्यायं इत्यमरः। मं त्रि गुह्यभाषणे॥७॥ कामम् उद्वेघलाघवार्थमेकपयत्ते नैव वत्तुर्थी
मुछीचावस्थामाह स्वपितस्येति। रात्रौ शय्यामधिशय्याधि तु स्वपितस्य मनो मोहवैचित्यस्नेह विशेषैव मोहने मो
हो मदनयुद्धं तत्र वा निमज्जयोतीत द्दशो कुर्वती या आलिंग्यांगानि श्लथयित्वालोचने चुंबति तत्र सैव द्दा भवति अथव
लतावेष्टितालिंगनादीनि कृत्वा यानेन चुंबनं करोति सैवं विधनिद्रांगना वालद्ददते त्वां विनाऽधुनाऽदर्शनीन विप
ता। त्वद्विरहात्स्वप्ननिद्रालब्धतिरेके सैवं विधांगना वा न अंगनापि न रोचत इति भावः। श्लेषप्रयत्नेन निद्राछेदविष
यविछिन्निलक्षणा अवस्था प्रोक्ता। कमेऽलंघनेदोघायेनेति ज्ञेयं। शय्यां अधिशीङिति कर्मता। त्वत्र अन्याराद् इतिपंच
मी॥१०८॥ एवमीमाह॥ स्मरेणेति॥ स नलः स्मरेण बाणैर्निरंतस्य निर्भिद्य लावण्यं तो दर्थमेव शोषयस्मात्तां कृशतां चेष्टे
वनीतः प्रापितः। लावण्ये स्थितं शरीरं त्तीणं यतः अनंगतामति कृशतां गतो अंगरहिततां मदनत्वेनीपमानोप्यं यं तेन म
दनेन सह हस्पर्द्धां सामर्थ्यं न त्यजति। रूपसाम्यात्तकुंदन कामेनाति कृशत्वं नीतः। तत अध्यपदे गोनंगः अनंगः समास इंधर पैः

मुद्दराकन्येतिवत्। कृतेपिकृशत्वेस्तुतरांसाम्यमेवास्मद्दितिभावः। अतएवलावण्यशेषमित्युक्तं। तत्पर्येवेतिपाठे
लावण्यशेषामेवकृशतां तथानयिष्ययथानेगतामाप्यमानोपितेनसहस्पर्द्धांनत्यजतीतिव्याख्या॥९॥सप्तमी
माह। त्वदिति। एषनलः त्वांप्रापयतिदापयतित्वत्प्रापकंतस्माद्घद्दनसांपरायंरथिनरात्तसोयुद्धहरणेदित्या
च दिकुलादिरूपात्रंस्पत्तिनविभेतियद्वत्वयिविषयेदास्य [stain] पिनलज्जतेततोहेतोःस्मरे
णलीलोवीणोः अतितस्यअतिशयेन। स्यशरीरेतनूकृतपक्रियान्स्वल्पःस्व[stain]भावोपिलूनःछिन्नःकिमि
तिसहेतुकोत्येत्त्वधर्मशीलत्वादयंसर्वदापातकाद्बिभेतिदासत्वेवयजत्वाद्बलज्जतेतइत्यस्यस्वभावः। सत्तु
त्वत्प्राप्तिलोभेननदृश्यते। शरीरस्यातिकार्श्यात्तस्यभावस्यापिकार्श्यंजातंइत्यनुमीयतइत्यर्थः। त्रपानाशा
वस्योक्तात्त्वत्प्रापकादित्यादिनात्वदन्यविषयपरित्यागेनविषयनिवृत्तिरेवतात्पर्यीवृत्त्यावर्ण्यतइतिश्लो
कतात्पर्य॥ अतितस्येतिस्वभावापगमेहेतुत्वार्थमुक्तंनतुतनुतावस्थाप्रतिपादनार्थं। शरीरस्यातितत्त्वणो
स्वभावस्यैशब्दत्तीत्त्राशब्दप्रयोगो। एनस्सःभीत्रापीतिपंचमी॥११०॥ पुनःत्रपानाशमेवाह। यदाप्रथमतस्त्व
पार्श्ववर्णयितुमाह। स्मारमिति। तस्यनलस्यविशालामाहतीलज्जासिद्धचिकित्सासमर्थस्यागदंकारस्त्वयैवेयस ३१

भा२ ल्लनत्वेसंभाव्यतइतिद्योतनार्थमति २

म्रहे निदानमो ना तच्यादिकारणविषयेः नादिकारणस्याज्ञानात् अविशत् प्रविष्टा। किंभूतस्य अपत्रयिष्णोः
लज्जाशीलस्य। किंभूते स्मारे मदजनितं घोरं दारुणं ज्वरं विकिरो प्रतिकूवीरो। केवसंक्रमेण जनिता सांक्रामिकी संसर्ग
जनिता रुजेव रोगस्व ह्येयादिर्घ्याधिः सयिएं परित्यज्यं यथा न्यं संसर्गितं प्रविशति। तथा लज्जाशीलस्य तस्य लज्जया मवित
ध्य सावनं विहाय वैद्यसमूहे दृश्यते कार्श्यं निदानाज्ञानात्। अथिरोगाद्द्वारः कुष्ठं तथापस्मार एवं च। सहभुक्त्यादिसंवेधात्सं
क्रामंति नरांतरमिति। वैद्यैः दृष्टेन लज्जां विहाय यत्नात् निदानं यदैव कथितं तदैव अस्माभिर्न ज्ञातमिति उक्ता लज्जिजितं लज्जा
शीलोपत्रपिष्णुरित्यमरः। ज्वरं नलोके तिपठी निषेधाद्द्वितीया। अपत्रपिष्णोः अलेहजिविर स्नुच्। अगदं रोगरहितं करो
ति अगदंकारः कर्मण्यण् अंते कारशब्द उत्तरपदे कारे सत्यागदस्येति मुम्। सांक्रामिकी अध्यात्मादित्वात् ठञ्। किं अनुशतिकादि
त्वादुभयपदवृद्धिः॥१७॥ अस्मीमाह। विजेतीति॥ सनलः हे नेमि त्वं रुष्णासि कुपिता सि किलेति संभाव्य अकस्मात्त्वत्कोप
न विनेव विमेतिभयं प्राप्नोति। तथा किलमिथ्यान्नतां त्वां आपश्यात् वा निजिह्न्वा। अकांडे ऽसमय एव त्वत्स्याक्षिविनेव सुख
तिशया द्दसति। तथायो लीक्षिवगच्छंती मिव त्वां अनुलसी कृत्य अहेतोः निष्कारणं यातिभयं प्राप्ने॥ तथा त्वया उक्तं इव संभा
षितं इव आगच्छामि त्वदादि एमयापूर्वमेव कृतमित्यादि स्नोघे निष्फलं जतिवक्ति प्रतिवचनं ददाति। उन्मादावस्था॥१८॥ नव

मीमीमाह॥ भवदिति॥ भवत्या वियोगेन विरहेण जनिता ऽछिदुरासंतता या आर्त्तिः पीडा तस्या धारा प्रणाली परंपरा सै
व यमस्वसा यमुना तस्याः मूर्छामयं मूर्छैव रूपं यद्द्वीपं जलमध्यावकाशः तस्मिन् महांध्यसणे महाज्ञानलक्षणः पंक
कर्दमस्तस्मिन् निःशरण्या रक्षितृरहिता अयं नलः महीमहेंद्रो राजश्रेष्ठ एव कुंजरो हस्ती निमज्जति ब्रुडति। हा खे
दातिशये। अन्योपि कुंजरो हस्ति पकं विना न ग्राह्यीयपंके ब्रुडति। पंकमग्नो गजो नोद्धर्तुं शक्यते। इति मूर्छा वस्था॥
एवं नवावस्थास्तव काः श्लोकाः लिपिमित्यादयो यथायथा मृत्याः। भवत्या वियोग इति सर्वनाम्नो वृत्तिमात्रे
तिपुंवत्। अछिदुरेति विदिभिदीति कुरच्॥१३॥ उक्तिविशेषेण दशमीमवस्थामाह॥ सखेति। सख्या पसख्याम्या वा
म दक्षिणहस्तो ऽस्यास्त्वजनमोचनं तस्मात् दक्षिणाद्दशभिः पंचेषुबाणैः कामबाणैः पृथक् प्रत्येकं अर्जितास्तु रवित्ता
सुदृशासु अर्जितप्रायासु मध्ये शेषा ऽवशिष्टा या तद्दशास्मृति लक्षणा तया कोरकैककलिकयानभःभागं भवलु
ति च्छिते भवतु साद्दशमी दशा स्वपुष्पतुल्या सर्वथा भवति त्यर्थः। एकैकेन मदनबाणेनान्यां दशा वस्था भव
ति अस्यतु नवद्दशमी नेति तस्या अवसरः अस्याः कोरकत्वं अनन्तु नूतत्वात्। तत्र लाभस्त्वं नभविष्यतीति हि सा
दशा भविष्यति सा मा भूत् तत्र स्मार्त्तिरेव भवतिभावः। दशायात्र प्रभवा न्नामग्रहणानर्हत्वाघन्न छन्दप्रयोगः। ३२

द्विरुक्तः शब्दो लक्षणया द्विगुणपर्यायः। शेषशब्दस्त्रिलिंगः अभिधेयलिंगत्वात्। पुष्पविकासेन आशिषि लोट्। रक्तरागः प्रथ
मं चित्तासंगस्ततश्चैव संकल्पः। निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः। उन्मादो मूर्छा मरणं चेति दशावस्था॥१४॥ प्र
कृतमाह। त्वयीति स्मराधेः कामजनितपीडातः सततं नियतमस्मि तेन हास्परहितेन तेन भ्रमिन्नतारा ज्ञात्व यि विषये त्र
हं प्रस्थापितोस्मि। नैमीपरर्थं त्वया विज्ञापनायेति। अहं इह आगत्य गुणे घुले भवत्या अनुरागिण्या भवत्या स्तव भावप्र
त्या प्रेमपरिज्ञानेन सफलः कृतकार्यो भूतः। नलस्य हृषो गुणी त्वं च गुणानुरागिणी च तत एव तस्मिन्ननुरक्तेति ज्ञात्वा ह
तार्थो जातोस्मीति भावः॥१५॥ धन्यासीति। हे वैदर्भि भैमि सा त्वं धन्यासि वाधिकासि। ययात्व पाउहारैरक्तिरमणीयैर्गुणैः
मोदर्पो दिः निष्कृत्यानैषधो धीरोदात्तो नलोपि समाकृष्य तस्य वशीकृतः। याईदृशो धीरं वशं करोति ततः परा का धन्य
त्यर्थः। दृष्टांतेन धन्यत्वं समर्पयति। खलु यस्मात् चंद्रिकापाः इतः परा का स्तुतिः यत्तया गंभीरमपि अब्धिं समुद्रं उत्तर
लीकरोति अतिशयेन स्वं चलीकरोति। तद्वत्त्वद्वशीकरणमेव तव स्तुतिर्धन्यता वा। अथवेदर्भी कामयरीतिः गुणैः (
श्लेषादिभिरलंकारैः। अन्यदपि विशालं दुर्धरं कैरालंघ्यते॥१६॥ नलेनेति। हे भैमि त्वं नलेन सह युक्ता भाया। शोभस्व। केन के
वा परिपूर्णेन शशिना निशेव। स नलस्त्वया युक्तो भायात् शोभताम्। कया का इव निशया शशीव। उभयोः समागमं उभावपि

स॰ ३

नै॰ष॰टी॰ व्यतिभातामित्यर्थः। तु उत्से स्ले पुनः। पुनः प्रतिमासं तत्युगं चंद्रनिशालक्षणं युग्मं युनक्ति युक्तं एवंविधो विधाता ब्रह्मापि युद्धंउ
भावेपि युयुक्षुः योक्तुमिच्छुः सन् योगाभ्यासं उपात्तं करोति। शिलोरमत्तीयं वक्ततं संघटयितुं अभ्यासं करोति अन्य
थाचंद्रनिशयोः पुनः पुन योजितं व्यर्थं स्यादित्यर्थः। पङ्क्तिः प्रमाणं। त्वभ्यासमासे इतिपाठे अभ्यासमग्र्यं यं सम्रद्धा
वव्ययीभावे वन्तु र्था अमभावः। योग्याभ्यासमार्के योरितिविश्वः॥११॥ स्तनद्वयइति। हे तन्वि कृशांगि नैषधस्य न ल
स्य अनल्पं व इन्द्रतरे वैदग्ध्यं कौशलं तस्य विवर्द्धिनी नाम्नापि कानो पत्राव्ली नौपत्रवल्लीपंक्ती नो वलनार वनासमा
प्तिं यदि द्रष्टु स्पृतितर्हि परं केवलं द्वयेपे। विशालते तवे वक्तनद्वये अतिपीनत्वात् नान्यस्या अल्पकुचत्वात्। द्रष्टु शक्ते
मापितपुस्तकः॥१२॥ एक इति। एकोऽसहायः सुधांशुश्चंद्रोऽतिविशालस्य त्वन्नयनद्वयस्य कर्पंचनकेनापि प्रका
रेणात्तिस्त्वमःसंतर्पणमर्षीयतानस्यान भवेत्। तत्र तत्र कारणं तत्सवंद्रोनलास्य लक्षणोयःशी तद्युति
श्चंद्रस्तेन सद्वितीयः ससहायः सन् च छोचनयोस्तव नेत्रयोराशेनकोनिर्मर्याद तत्प्रिकारीअस्तु भवतु। चकोरतु
ल्यस्य त्वन्नेत्रद्वयस्य एकेन चंद्रेण तस्य भावात् चंद्रद्वयेन भवितव्यातत्र चंद्र सहकारी नलास्य चंद्रो भवत्वित्यभिप्रा
यः। तत्त्वा स्पर्पयन्त्र कार्य इति भावः। तदासवनकं तत्से नोत्स्यंतो यस्य दर्शन इत्यमरः॥१५॥ अहो इति। यस्त इति
युग्म। नलीयानल संवंधीतयो रूपः कल्पतरुः कल्प वृद्धः अहो आश्चर्यरूपः। आश्चर्यरूपत्वमेव विशेषयोः प्र ३३

कटयति। कीदृशः कल्पतरुः त्वत्पाणिजन्माग्राणि तव नखा यान्येव स्फुरंती प्रकाशमाना अंकुरश्रीरंकुरशोभा यस्य सः खलु नि
श्चये। अंकुरानंतरं त्वद्भ्रूयुगमेव यस्य कल्पवृक्षस्य द्वियत्रीपत्रद्वयं तवाधरश्चोष्ठ एव यस्य कदंवः मध्यमांकुरो नालमित्य
र्थः। रज्यति आरक्तो भवति। प्रथमोंकुरापेक्षया मध्यमांकुरस्यातिरक्तत्वात्। यः ते कराभ्यां नवोन्नतनः पल्लवितः पल्लवयुक्तो
विद्यते। मध्यमांकुरापेक्षयाऽतिरक्तत्वात्तव बाहुस्तौ वयस्य पल्लवौ जातौ। यत्तव स्मितेन कोरकितः कलिकायुक्त आस्ते प
द्मवानंतरं कोरका भवंतीति स्मितस्य सितत्वात्कोरकत्वं। कोरकापेक्षया विकस्वराणां पुष्पाणां मृदुत्वात् यः तव अंगम्रदिम्ना
शरीरमार्दवेन पुष्पितः पुष्पयुक्तो विभाति। अतिमृदूनि तवांगानि यस्य पुष्पस्थाने जातानि। यत्तवैव स्तनश्रिया फलितः
फलयुक्तः तव स्तनाववयस्य फलस्थाने जातौ। अतीवाश्चर्यजनको यं नलीयस्तपःकल्पवृक्षः। एवंविधांत्वां प्राप्तुं ते
नैव तत्र यस्तवैवं नान्येनेति भावः। अन्यस्य तरोरेते परार्थाः क्रमेण भवंति एतस्य तु एककालमेवेति अहो शब्द आश्चर्यं
द्योतयति। कलेवः सायकेनीपेनापेनालेशाकेकलेव्ययीति विश्वः। नलीयः वानामधेयस्येतिवृद्धसेनापांद्यद्वाच्छः। रज्यति कु
विरजो रितिकर्त्रे रिशपन्परस्मैपदे। पदे। पल्लवितत्वात्कादिः॥ १२१॥ कोसीति। खलु त्वत्रस्तो हे भैमि चांतवनलस्य वमिषः प
रस्परयोरनुरागस्तस्य समीकृतो समीकरणो नलस्य त्वयि यानावानऽनुरागस्ता वानेव तव नलेनुराग इति उभयोरनुरागस्य

स·२

ने·दू·टी·
३८

तुलानार्घ्यं स्मरेणाइं दोष्णं द्वस्य मंडलीकांसी कृतापरिमेयवस्तुधारणार्थं कांस्यपात्रमिव कृतास्मीति। किंन तामेसक्तासे
व स्वारश्मिप्रकराः किरणसमूहा र नुसमूहा श्वयस्याः सा। निजैवर्षा। यैवनारा वलताबाणवद्वी तुलाव त्तुलां दंडइव
ता। केसायपत्रविशेषा यहितं कंसी। यंतस्मैहितमिति प्राक्की। ताध्यः। तस्यविकारः कंसीयपरशव्ययोरिति यञ्छस्य
लुकृकांस्यं ञ्याकांस्यं कांस्ये संपन्ने कांसीकृतं द्वोक्यङ्घाभ्व्वितिहल उत्तरस्य च्व्याः परस्य तियकारमात्रस्य लोपः अव
र्णस्य अस्य च्वाविति ईत्वं कंसीकृतेति पाठे कंसोदत्या तरेपिव। कांस्यंव कांस्यपात्रेवेति विग्रहः। किरणप्रग्रहौ रश्मी इत्य
मरः॥१२॥ सचेति। हे नेमिम दनोसवेषुतत्पाणिपद्मेन ललहस्तकमले श्वैर्लग्नाः पश्चादुच्छिनाहत्व स्कुवयोः पत्रलेखा
पत्रवलयः त निर्गतान लपाणिपद्मेनवलिविताः न्यस्तमेवपाणिपद्मं प्रविशंतु। किंभूते पाणिपद्मे सत्वेन सत्वभावेन नक्त
तो जनितः स्वेदः धर्मोदकं तद्वर्णामधूच्छेसिक्यकं तेन सांद्रनिविडे। रक्तोक्तवषशात्पत्रावल्या मार्गे नेभवलिस्पर्यः॥
कारणात्कार्यस्यं तपडवितइतिभावः। मधूच्छेयधालिखितमस्तीति मधूच्छपदं। पद्मः पुंल्लिंगेपि। ततस्तामिति युज्यते।
॥१३॥ वेधाधेति। हे नेमियुवानोतरुणा युवां केलिवने क्रीडावने मरुद्भिर्वायुभिः पुनरुक्तं पुनःपुनः मुक्तौ त्यक्तौ मस्त नव
ष्पिश्वतीहलेनेगम्हलितौ। किंभूते मरुद्भिः वेधः पंकजासना ह्रिमुरतवं घेरा ढीविस्तृतै नानारते अनेकप्रकाररतेत देव ३८

मल्लयुद्धं तेन श्रमो दितेः प्रकर्षेणापरिमलं प्रापितेः। संभोगेन पुष्पेषु च्युतेषु पुनः पुनर्मोचनं संगच्छते। अपरं च मल्लयुद्ध
हृष्टैर्देवैर्मुक्तां पुष्पवृष्टिं मल्लो गृह्णाति। ततः मरुतो पवना मरुद्देवा इत्यमरः। युवतिश्च युवा च पुमानित्येकशेषः॥१२४॥
अन्योन्यस्येति॥ अधुना भयसंबंधानंतरं अन्योन्यसंगमवशात्परस्परसंयोगवशात् विकसन् विलासो विभ्रमो ययोस्तेन
स्यापि नलस्यापि तेपितवौपि मनसी परमाणुयुग्ममिव विभातां शोभेतां। किंभूतं परमाणुयुग्मं। मनसिजस्य कामस्य
तनुं शरीरं पुनः स्रष्टुं प्रवृत्तं अत एव आरंभवादे द्व्यणुकं करोतीति द्व्यणुककृत्। सक्रियाभ्यां द्वाभ्यां परमाणुभ्यां द्व्यणुकमार
भ्यते एवं क्रमेणा महत्कार्यमारभ्यत इति सिद्धांतः। दग्धस्य कामस्य मनोज्ञत्वात्मनश्छिन्नत्वात्। ततश्चैतद्दमयंत्या मनो
द्वयेन द्व्यणुकमारब्धं यत्तद्वपुर्येन केनचिदपि मनोद्वयेन कर्तुं न शक्यते एतादृशपरस्परानुरागस्य कुत्रचिदप्यभावात्। तत
श्च युवयोरेव मनोद्वयेन कर्तुं शक्यते नान्येनेति भावः। युवयोः परस्परागवाक्कुल्यात्कामः शरीरी स्यादिति वा भावः॥१२५॥ नुरा० ८
कामरति॥ असौ कामः कौसुमेन चापेन दुर्जयं पंजे तु मशकां अमुं नृपेन लंजेतुं अत्राणो निर्दयविवेशजातां अथवपुष्पाणि
जन्यत्राणाहितवणुत्तातो अधिगुणां अतिशयितमौर्व्यादिगुणयुक्तां आरोपितमौर्वीकां चलां लन्मयीं धनुर्वल्लीं धनु
र्लतां आसाद्य प्राप्य मार्गं प्राप्य माघेति। अधुना न लंजेष्यामीति तु घेति किंभूतो धनुर्वल्लीनिवसता विद्यमानेन सिंह

रेणोमां इयं लोहि हिन्तिमाय स्यांतयाधनुः ए ए भागे अथवपश्चाद्भागे कियदंत्रैव याकियद्दीर्घ्या याग्रीवामध्येकेवश्चतस्या
अलंकृतिः अलंकारभूतापदस्त्रलतादीर्घता पदसुत्रेणात्यर्थः। तयाभ्राजिष्णुशोभमाना। कमेवकघेरखपत्रपरीत्तैरि ४
त्थयेवकघणप्रकारया धनुर्योग्यवेणुपरीक्षा। यानि घृष्यमाणेपि स्निग्धं बलतिबेन्नदापरिपाकोपिः इतिधातुष्व प्रसिद्धिः।
कामस्यत्वां विनाननवशीकरतं किमपिन विघतइति भावः। भ्राजिष्णुभुवश्चेतिचकाशदिष्णुच्। त्वदितिहि नेमितं वि
भोर्मनोभुवः कामस्य त्वकुच्छावलेस्तवहारविशेषणं केमौक्तिकान्येवगुलिकाः स त्स्मान्मृदालकान्विद्धिजानीहि। त १२६
पात्तरराज्ञसिंहं नृपश्रेष्ठं नलं वेष्टं अपत्रते नलमेवराजसिंहाख्यं पासिविशेषं कामस्य वेध्यं लक्ष्यं विद्धि। तथाच्चमात्मा
५ नमपितांवत्यमाणयुक्तां मंजुमनो। हां धनुर्मंजरीं नुर्लतां जानीहि। नवरोमालिः रोमराजिः यस्याधनुर्लतायाः नित्यं सर्व
दाश्चैकनिवासो मध्यवसतिस्तयालालिततमा अतिशयेनन लितास्या भमानात्स्या मौर्वी तया भज्यमानं सेव्यमानं नुत्य
मानमनुभूयमानं वाऽखिलं विलासं चापमध्यव त्रिंशो भमानमैः वर्ण्याः संपूर्णा लीलामालेवते। अंगीकरोतिरोमराजिरेव
मौर्व्याः स्थाने जातेत्यर्थः किंभूता रोमालिः लसंती नाभ्येव मध्यं बिलं यस्याः सा गुलिकाधारणच्छिद्रस्थानेनाभिरेव ना
तिस्पर्थः गुलिका धनुषि तिनामा त्वद्रूपेण शास्त्रेण नलः कामस्य जेयो नान्येनेति भावः। धनुर्मौर्वी मध्ये गुटिकारोपणस्था ३५

नविलंभवतितद्रूनाभिरेव रोमालिर्मौर्वी। अंगयष्टिर्धनुः। स राजहंसो वेध्य इत्यर्थः। विमुक्ता गुलिका धनुः क्रीडां करोति।
हारेनेदायष्टिमेदागुच्छगुच्छा ईगोस्तनाद्युत्समरः। राजहंसो नृपश्रेष्ठः कोरंवकलहंसयोरिति विश्वः॥१२७॥ पुष्पेषुरि
ति। तेन नलेन सौंदर्यादिना गुणेन जितो ऽयं एव निर्विघ वैराग्यं प्राप्य पुष्पेषुः कामस्ते तव विकुरेषु केशेषु पुष्पेषुत्वा स्वं
शरवर्य्यं वाणसमूहं पुष्पसमूहं विक्षिपेत्यक्तवान्। तव भालमूले ललाटमूले भ्रूरूपस्थाने स्वं धनुस्त्यक्तवान्। रौद्रसंवेष्टिनि
निरूपे तावत्कोपिन्ननुत्रीणि तृतीयनेत्रलक्षणं मर्दनपात्रं स्वीयां तनुं च विक्षिपेत्क्षिप्तवान्। स कामो धुनाविततनुः शरीररहि
तोऽपच विशेषेण कृशः श्रमः तज्जयाय तेनलंतेन तुल्यामेवाश्रमं आश्रयत्तत् तपातवउरोजौ स्तनावेव शैलौ तावेव वनिलयः
स्थानं यस्याः सा तत्र विषमा नायत्रा लिःपत्रव स्त्रीपंक्तिस्तस्य कामस्य पर्णशालेवावरतिभवति। सेमीकेशपाशपुष्पाणां का
मजनकत्वात्कामवाणात्वं भ्रुवोरपि कामजनकत्वाद्धनुष्वं स्तनपर्वतनिलयपत्रवल्लीनामपि तज्जनकत्वात्तद्गृहत्वं। त्व
येव शास्त्रेण काम्येन मसज्जे तवाभ्याम्यत्किं विज्ञ जयायेति त्वदाश्रयेण मदनस्तं पीडयतीत्यर्थः। अन्येपि जितः शस्त्रादित्यक्त्वा ऽ
न्यो देहं स्यक्त्वाश्रु तुंजे तुं पर्वते पर्णशालामधिष्ठाय तपस्यति। अनुप्राणूक्तसप्तम्यर्थे सादृश्ये वाव्ययीभावः॥ क्षिपेत्स्वरितेत्वा।
त्तद्द॥१२८॥ इतीति। तत्र तस्मिन्नयतनत्रि णिहंसइतिपूर्वोक्ते आलपति वदति सति तरनु संधो भैम्यत्रैव पाणिपराः सख्यश्चिरात्

स॰३

ने॰पू॰टी॰ वहुकालेन भैमीपरीयुः दृश दिग्भ्यः समागतत्वात्परितो वेष्टयामासुः। अथ अनंतरं स हे सोपि ते तुभ्यं शर्म सुखमस्तु

३६ मो विसृज्य प्रेषय इत्युदीर्योक्त्वा वेगात्तेन निषधाधिपराजधानी नलनगरी तं गामा नलपीडास्मरणाद्वेगगमने।

।१४७। त्वित इति। सा भैमी प्रियेसा नलम्पटेति। यः पतग पुंगवो हंसस्तस्य गोर्वाणी सैव हैयंगवीनं ह्योगोदोहोद्भवं घृ

तं रसात्तत्तप्तीतेः स्वादं २ आस्वाद्य पास्य घासादं रम्याकर्णपिर्पत्पर्पः। तत्रिं प्राप्ता अतः अंतःकरणो नितांतमतिशयितं

तापमपि संतापमपि न प्राप अतुलां निःसीमां मूर्छामपि नाप नष्टं प्राप। किंतु तं हैयंगवीनं वेत्तोजन्मनः कामस्य

शरभूतानि प्रसूनानि पुष्पाणि तेषां मधुभिः रसैः अपचमाक्षिकैर्व्यामिश्रतां मेलनं आश्रयस्मानुवृत्ता। तथा असि

मनिर्मयादं तथा उक्तं सुस्वादु सुरभि स्वादि सुगंधि वा सम्यक्त्वेन मधुमिश्रितं घृतं नितांतं पीतं मत्सं तापमोहौ जन

यतीति। तस्यास्तेनैव त्या श्रुर्यो। प्रहाए एवं भूते हैयंगवीने आस्वाद्यापि तस्मिं न प्रापतापं प्राप मूर्छामपि प्राप। हंसमु

खान्नलगुणाकर्णने नानुरागवान् उल्लासात्तापमोहौ तस्या जातविति भावः। स्वादं स्वादं मपीति वा योजना। असौ

ममृषसुरभीत्यर्कं वाष्ये। तत्रनुहे हैयंगवीनं यत्र ह्योगोदोहोद्भवं घृतमित्यमरः। पुंगवीत्यत्र गोरतद्धिते ति टचि टि राम

त्वान्ङीप्। हैयंगवीनं संज्ञायामिति साधुः। स्वादं स्वादं आभीक्ष्ण्ये णमुल्।।४७।। तस्या इति। वाष्यवारि वाष्पाम्बु पिते ३६

कग२

रपतिवंधुं नलसुहृदं हंसं अनुव्रजंत्यास्तस्या दृशः भैमी दृष्टेर्न विराद्धी प्रेमवयघस्माद्वधीव भूत्वा अग्रे गंतुं न ददौ
त त्तस्मादनेन हंसेन पार्श्वे पि तस्मीपेगछता पि भैमीदृष्टेः सकाशाद्विप्रकृष्टव्यवहिती भूतं। समीपवर्त्तमानोपिन
ल वियोगाद्धंसगमनाद्वा जातेनाश्रुणा दृष्टेर्नरत्तेः इत्यर्थः। तु पुनः आरादपि दूरादपि वर्तमानेनानेन विनिरुत्तेन व्यव
दधे व्यवहिती भूतं। यद्यपि दूरंगतस्तथापि प्रियवंधुत्वात्तस्यामनतिप्रवर्त्ति दृष्टेर्वेत्यर्थः। वंधुमनुव्रजतो वारि वाधे
भवति। ओदकांतात्प्रियं यांथमनुव्रजेदितिवचनात्। दृष्टेः पार्श्वपीतिवा॥ तदनेनेति पाठः आराद्दूरसमीपयो रि
ति अमरः। विप्रचलुषेऽकर्मकत्व विवक्षया भावे लिट्॥ ३॥ अथ पद्मत्वा तयोर्मध्ये कः हंसः निषधनरपतेर्नलसमी
पए तत्सर्ववृत्तं निषध्य चेव वसेतिशेषः आख्यातुं कथयितुं प्रतस्थे। किं कुर्वन्नुपन्नयोः कंपभैदैः कंपविशेषैः भैमीज्ञाप्ति
रूपायाः कार्यसिद्धेः अस्तित्वं सद्भावं स्फुटं कथयन्। इति पूर्वोक्तमार्गेणोपहतवं वोयामित्तावयस्याः सख्यः अन्योभै
मी निन्युः गृहं प्रापयामासुरित्यर्थः। इति किं हे प्रियसखि त्वं कांतारे दुर्गमे वर्त्मनि विपथे निर्गतासि प्रस्थितासि। नु
अपि मुग्धे भ्रांतचित्ते भैमि पदवी मार्गः विस्मृता किं त्वया। त्वं मा रोदीः एहि आगछ। वयं सर्वा मिलित्वा यामः गृहं प्रतिगछा
म इति। पक्षकंपनविशेषः कार्यसिद्धिसूचकः। अन्योपि हस्तचलनेन विनाकार्यसिद्धिं कथयति। कांतारे वर्त्म दुर्गमभि

स॰३
ने॰पू॰टी॰ त्यमरः। असीत्यव्ययात्त्वप्रत्ययः। आख्यातेतिवापाठः॥३२॥ सरसीति॥ स हंसः यत्र सरसि तत्पार्श्वे अपश्यत। त सरस
३७ स्तीरंभजले तस्य अशोकानोकहस्य अशोकवृक्षस्य उपकूले कूलसमीपे तं नलं प्राप। किंभूतं स्मरतरलं मदनजनितपी
डयाचंचलं। तथा किसलयानामग्रपल्लवानां दलानि कोमलांकुरास्तेषां तल्पशय्या तस्यामपि म्लायिनं म्लानशीलं॥
किंभूतस्य अनोकहस्य फलं ते दीप्यमाना असमशरेषवः कामबाणास्तैः सह स्पर्द्धते एवंशीला नि पुष्पाणि येषां अद्धिःस
वृद्धिस्तेषु कैमौलिरग्रभागो यस्य। विरहव्यथया हंसं प्रतीक्षमाणस्तेरैव स्थितो यत्र पूर्वं हंसेन दृष्टः। अशोकपुष्पा
णां रक्तत्वात् अनलत्वात् कामबाणतुल्यत्वं॥१३३॥ परवतीति॥ नले उन्मादवशात् इति सति असौ हंसः उपनम्रः समीपमाग
तः सन् तं भैमीधृतां तं सर्वं शशंस कथयति स्म। इतीति किं। विचित्रप्रत्यक्षीकृतं। भैमीमित्याह। एवं हे समपि हे परवति पि
अधीनत्वात्परतंत्रे हे स्मर यंत्रि अहं त्वां प्रति अद्यापि नागच्छसीत्यादि किं विदधपि न वदामि स्वातंत्र्याभावात्। हे हंस त्वं
दूतं शीघ्रं मुपत्तमम तत्समीपमागच्छ। सा भैमी मामुद्दिश्य किमाह। ब्रवीत्। तत्र शंस कथय इति वाक्यार्थः कर्मतद्वचनं
नेतरमेवा यंगवाक्यं कथितवानिशंक्याह प्रियमिति। हि यस्मात्तसु कृतं धार्मिकाणां जीयं त्वाभी एम तु लक्ष्मीकृत्य राम
त्वस्पृहा। याः स्वेच्छाया एव विलंबः नलनृपस्य। देवतेषां वक्तव्यानुभिक्षा भवतीति तेष्व पुण्यवशात्याद्भुवंती भावः क्वस्पृहा ३७

अथाबिंबमानमुच्यते। शिल्पावतंसे। पादपद्मात्केशांतं सविंशतिशतं।१२ः गुलं। तदेकाष्टांशकं चैव पंच
स्थानमुदाहृतं।१। दृष्टिभागानुसारेण स्थानभेदोऽधुनोच्यते। मस्तकोदयमारभ्य केशांतं चतुरंगुलं।
१२।३ उष्णीषकं तु नतीयं ९ तस्याधश्चतुरंगुलं॥ ललाटं केशसीमांतं २ तस्याधः घ्राणमानकं।३। नासा दीर्घं ३
नुविलेयं पुटांतं तन्मशास्यते। पुटान्मुखुकांतं च तस्याधश्चांगुलं ३॥ ग्रीवितं।४। चिबुकोऽसंधिरथां ३॥
स्तनतः कंठो युग्मांगुलः ५।५। हिक्कादि हृदयांतं च त्रयोदशामितं भवेत्। तस्याधो नाभिसीमांतं तत्सम
तु १३ त्रिगदिशोनूर्ध्वं ६। नाभेरधस्तान्मेढ्रांतं समंगुलौनि त्रयोदशा ७। मेढ्रांताच्चोरु दीर्घं स्यात्षड्वि
शा २६ संमितं भवेत् ७। जानुतुंगं चतुर्मात्रं ११ जंघा चोरुसमा २६ भवेत्।१०। गुल्फादधः पार्ष्णि
भागश्चतुरंशः ४ कीर्तितः १३।१८। एवं सार्धविंशतिशतांगुलोऽभ्या १२ः मूर्तिरुच्यते। उष्णीषकं ४ ल
लाटं ४ नासिका ५ चुबुकं ३। [illegible] संधिः ५ कंठः ४ हृदयं १३ नाभ्यंतं १३ मेढ्रांतं १३ ऊरु २६ जानु ४
जंघा गुल्फांता २६ पार्ष्णिः ४। एवं त्रयोदशा १३ धातु विभागेन १२ः सविंशतिशतांगुलानि। ततोऽगानां
तु मानानि वक्ष्यंते तत्प्रभेदतः।९।

यतिकविरास्ष्टहायाविलंबः क्वेति योजनायां। सुकृतांस्तुकर्म पापमेव पुण्यमुत्सृज इति क्विप् आहेति विभक्तिप्रतिरूपकमव्य
यं भूतार्थे॥३४॥ कथितमिति॥ स नरेंद्रो नलः हंसेन कथितमपि प्रियाभैम्या भाषितं वचनं किमिति २ कीदृक् ३ इत्येवंत्रा
दरातिशयेन हंसं पृष्टवान् पुनरपि हंसं शंसयामास वादयति स्म। अथ च अनंतरं सोऽद्रो निविडः आमोद एवमाध्वीकं मधुत्त
नमत्रोहहृष्टः सन् अधिगतं ज्ञातार्थं तद्गीर्भाषितं त्वयमपि शतकृतः अनेकवारं हंसेन याकृतं तं पैवेदकुभैम्याकृमीदृशं प्रेमा
त्तमिति शिरःकंपाद्यभिनयेन नत्वा वचः हेत्रनृदितवान्। अत्यादतस्पेयं जातिः। मद्याविशेषश्चोक्तमपि पुनर्वादयति।
त्वयमपि पुनर्वदति। मधु माध्वीकमध्ययोरित्यमरः। माद्वीकमिति पाठे मद्वीकायाद्राक्षाया विकारो माद्वीकं। शंसः शब्द
कर्मत्वाद्गौ कर्तुर्ण्यंतिकर्मसंज्ञा। शतवारं शतकृत्वः। संख्यायाः क्रियाभ्यावृत्तिगणने इति कृत्वसुच्॥१३५॥ ॥श्रीहर्षमि
ति॥ वार्त्तीयीकीर्तिद्वैतीयीकवत्॥ ॥इति श्रीवेदरकरोपनामकश्रीमन्नरसिंहपंडितात्मजनारायणकृते नैषधी
यप्रकाशे तृतीयः सर्गः॥ ३॥ ॥ ॥ शुभमस्तु॥ श्री कृष्णसत्य॥ ॥ ॥

यदिद्रासामीकुरुतेसुधर्मेश्लरोषास्यत्त्वांशामपिस्थितस्य तत्क्षे पुदीनांकुरुते तमेवधनि [illegible] वद फलसकलस्या

इति नैषधीयचरिते तृतीयसर्गटीका समाप्ता ॥

नै. टी. ३. श्री

138 / 60